# पवमान होम विधिः

- नवमं मण्डलं पावमानं सौम्यम्।
- स्वादिष्ठया दश मधुच्छन्दाः, पवस्व मेधातिथिः, एष शुनश्शेपः, सन हिरण्यस्तूपः, समिद्ध एकादश, काश्यपोऽसितो देवलो वा, विंशति स्सूक्ता न्याद्यमाप्रिय श्चतुरनुष्टुबन्तं, मन्द्रया नव, असृग्र, मेते सोमाः, परि प्रिया, प्रस्वानास, उपास्मै, सोमा असृग्रम्।। 1।।
- सोमः परि प्राष्टौ, एष धिया, प्र ते, प्र निम्नेनेव, परि सुवान स्सप्त, यत्सोम प्रकविः, एते धावन्ति, एते सोमासः, सोमा असृग्रं, प्रसोमासः, पवस्व षड्, दृह्ळच्च्युत आगस्त्यः, तममृक्षन्तेध्मवाहो दाह्ळच्च्युतः, एष कविर्नृमेधः, एष वाजी प्रियमेधः, प्रास्य नृमेधः, प्रधारा बिन्दुः, प्रसोमासो गोतमः, प्रसोमासश्श्यावाश्वः, प्रसोमास स्त्रितः, प्रसुवान, आ नः पवस्व प्रभूवसुः, असर्जि ससुतो रहूगुणः, एष उस्य आशुरर्ष बृहन्मतिः, प्र ये गावो मेध्यातिथिः, जनयन् यो अत्य इव।। 2।।
- प्रणोऽयास्यः, स पवस्वा-सृग्र-न्नया सोमः, पञ्च कविर्भार्गवः, तन्त्वा पवस्वोत्ते शुष्मास उचथ्यः, अध्वर्यो परिद्युक्ष उत्ते चतुष्कमवत्सारः,

अस्य प्रत्नां - यवं यवं - परि सोमः - प्रते धारा – स्तरत् – स पवस्व प्रगायत्रेण - उपान्त्या पुर उष्णिक्। अयावीती त्रिंशद् महीयु रेते असृग्रं, जमदग्नि रापवस्व निध्रुविः, काश्यपो, वृषा सोम कश्यपः।। 3।।

- हिन्वन्ति भृगु र्वारुणि र्जमदग्नि र्वा, पवस्व शतं वैखानसा अष्टादश्यनुष्टुप्, परा स्तिस्र आग्नेय्यः, त्वं सोमासि द्वात्रिंशद्भरद्वाजः कश्यपो गोतमोऽत्रि र्विश्वामित्रो जमदग्नि र्वसिष्ठ इतीह तृचास्सप्तर्षयः। शेषे पवित्रो वसिष्ठो वोभौ वा पवस्व सोम तिस्रो नित्य द्विपदा गायत्र्यः, अवितान स्तिस्रः पौष्ण्यो वा यत्ते पवित्रं पञ्चाऽऽग्नेय्य स्सावित्र्यग्नि सावित्री वैश्वदेवी वा, सामन्त्यास्त्रिंशीः, पुर उष्णिक्, सप्त विंश्यनुष्टुबन्त्ये च ते पावमान्यध्येतृ स्तुती।। 4।।

## पवमान (होमादि) प्रयोग सङ्कल्पः

- **मम गर्भे वसतः, जातस्य, जायमानस्य, वर्धमानस्य च, यदुग्रं पापं**
- **मातृ – पितृ – वचनोल्लङ्घनात्, स्थावर – जङ्गम हरणात्,**
- **गोवधात्, चौर्यात्, स्त्रीवधात्,**

- क्रय विक्रयात्, योनिदोषात्, अभक्ष्य – भक्षणात्, अभ्योज्य – भोजनात्, असत्प्रतिग्रहात्, असंभोजनाच्च यत्पापं,
- बालहननात्, मातृ – पितृ – वधात्, भूमितस्करात्, सर्ववर्णगमनात्,
- अकृतयजनात्, अकृताध्ययनात्, अज्ञानाच्च यत्पापं,
- अयाच्य याचनात्, अयाज्य याजनात्, अमन्त्रान्न भोजनाच्च यत्पापं,
- औपसन, वैश्वदेवादि नित्यकर्माकरणाच्च यत्पापं,
- संवत्सरकृत - अशेष पापक्षय द्वारा, मम शरीरशुध्यर्थं,
- पवमान – होमोक्त फल सिद्धये च
- पवमानमन्त्रै र्होष्यामि/ पवमान मन्त्र पारायणं करिष्ये/ पवमान मन्त्रपारायण पुरस्सरमभिषेचनं करिष्ये।

## अन्वाधानम्।

- .. .. .. अग्नीषोमौ चक्षुषी आज्येन,

- पवमानं सोमं चत्वारिंशद्वारम्(40),
- समिद्धमग्निं पवमानमेकवारम् (1),
- तनूनपातमग्निं पवमानमेकवारम् (1)
- इळोग्निं पवमानमेकवारम् (1),
- बर्हिरग्निं पवमानमेकवारम् (1),
- देवीर्द्वारोऽग्निं पवमानमेकवारम् (1)
- उषासानक्ताऽग्नि पवमानमेकवारम् (1),
- दैव्या होतारा प्रचेतसाऽग्निं पवमानमेकवारम् (1),
- तिस्रो देवी स्सरस्वतीळा भारतीरग्निं पवमानमेकवारम् (1)
- त्वष्टारमग्निं पवमानमेकवारम् (1)
- वनस्पतिमग्निं पवमानमेकवारम् (1),
- स्वाहाकृतिमग्निं पवमानमेकवारम् (1),
- सोमं पवमानं पञ्चदशोत्तर पञ्चशतवारम् (515),
- अग्निं पवमानन्त्रिवारम् (3),

- सोम पवमान मष्टादशवारम् (18),
- पूषणं पवमान न्त्रिवारम्(3),
- सोमं पवमान न्दशवारम्(10),
- अग्निं पवमान न्द्विवारम्(2),
- सवितारं पवमानमेकवारम्(1),
- अग्निसवितारौ पवमानमेकवारम्(1),
- सवितारं पवमानमेकवारम्(1),
- अग्निसवितारौ पवमानमेकवारम् (1),
- विश्वान् देवान् पवमानमेकवारम् (1)
- सोमं पवमानन्त्रिवारम् (3),
- पावमान्यध्येतारं पवमानन्द्विवारम् (2)।

दानमन्त्राः

(1) गोदानम् - गवा मङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश। यस्मात्

तस्मात् शिवं मे स्वादत श्शान्तिं प्रयच्छ मे।

(2) क्षीर दानम् - अलक्ष्मीं हरते क्षिप्रं सुख सौभ्याग्य दायकम्।

क्षीरं मांगल्य मायुष्यं, अत श्शान्तिं प्रयच्छ मे।

(3) आज्यदानम् - कामधेनु समुद्भूतं देवाना मुत्तमं हविः। आयु

र्विवर्धनं दातु राज्यं पातु सदैव माम्।

(4) मधुदानम् - यस्माच्छ्राद्धे पितृणाञ्च, पीतं मध्वमृतोद्भवम्।

अतस्तस्य प्रदानेन मोक्ष स्स्याद्दुःख सागरात्।।

(5) उदकदानम् - पानीयं पावनं श्रेष्ठं प्राणिनां उपजीवनम्।

तस्मात् पानीय दानेन शातिरस्तु सदा शुभा।